Himalayavandana

# हिमालयवन्दना

## Document Information

Text title : Himalayavandana

File name : himAlayavandanA.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : vAsudeva dvivedI shAstrI

Proofread by : Mandar Mali

Translated by : Mandar Mali

Description/comments : Bharata Rashtra Geetam, Sarvabhaum Sanskrit Prachar Karyalay Pustakamala 38, Vasudev Dvivedi Shastri (Ed.)

Latest update : May 1, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# हिमालयवन्दना

जय जय वीर हिमालय ! वन्दे
देवी - देव - विहार । वनस्थल !
पुण्य - तीर्थशत - सेवित ! निर्मल !
सिद्धि - योगिजन - वन्दित ! अम्बर -
चुम्बि - चारु - शृङ्गालय ! वन्दे
ऋषि - महर्षि - मुनि - संस्तुत - वैभव !
कालिदास कवि - कीर्तित - गौरव !
भारतीयजन - मानस - मन्दिर
महादेव ! गरिमालय ! वन्दे
मानसरोवर - लहरी - झङ्कृत !
श्री कैलास शिखर - समलङ्कृत !
तिब्बतीय भू - वैभव - भूषित !
वदरीवन - सुषमालय ! वन्दे
तव पदकमलतले नतमस्तक-
मुद्धत रिपु-दलने असिहस्तक
मद्य वृद्ध - शिशु - युव - युवती जन
वृन्दमिदं महिमालय ! वन्दे
अप्रमेयबल ! निर्भय ! निर्जर !
शत्रु - सैन्य - दुर्द्धर्ष ! भयङ्कर !
हीन - चीनजन - पदतल - दूषित
धूलिमलं प्रक्षालय ! वन्दे
जय जय वीर हिमालय ! वन्दे ।

- वासुदेव द्विवेदी शास्त्री

Proofread by Mandar Mali

*Himalayavandana*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*